K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777

# श्रीमहालक्ष्मीमहामन्त्रः

आचम्य, प्राणानायम्य, देशकालौ सङ्कीर्त्य श्रीलक्ष्मी-नारायणप्रीत्यर्थं, ममाभीष्टसिध्यर्थं, श्रीलक्ष्मीनारायणप्रसादसिद्ध्या मम (यजमानस्य) ...नक्षत्रजातस्य ग्रहदोषपीडापरिहारार्थं अभीष्टकामनासिद्ध्यर्थं श्रीमहालक्ष्मीमहामन्त्र जपाख्यं कर्म करिष्ये ।

अस्य श्रीलक्ष्मी महामन्त्रस्य भार्गव ऋषि । श्रीमहालक्ष्मीर्देवता । अनुष्टबादिनानाछन्दांसि ।श्रीं बीजम् । ह्रीं शक्तिः । ऐं कीलकम् । ममाभीष्टसिद्ध्यर्थं श्रीमहालक्ष्मीनारायणप्रसादसिद्ध्यर्थं जपे विनियोगः ।

**अथ सूत्रन्यासः**

ओं भार्गवऋषये नमः शिरसि । अनुष्टबादिनानाछन्दोभ्यो नमो मुखे । आद्यादिश्रीमहालक्ष्म्यै देवतायै नमो हृदये । श्रीं बीजाय नमो गुह्ये । ह्रीं शक्तये नमः पादयोः । ऐं कीलकाय नमः सर्वाङ्गे ।

**करन्यासः**

ओं ऐं श्रीं अङ्गुष्ठाभ्यां नमः । ओं ऐं ह्रीं तर्जनीभ्यां नमः । ओं ऐं क्लीं मध्यमाभ्यां नमः । ओं ऐं श्रीं अनामिकाभ्यां नमः । ओं ऐं ह्रीं कनिष्ठिकाभ्यां नमः । ओं ऐं क्लीं करतलकरपृष्ठाभ्यां नमः ।

**हृदयादिन्यासः**

ओं श्रीं महालक्ष्म्यै हृदयाय नमः । ओं ह्रीं विष्णुवामाङ्क-संस्थितायै शिरसे स्वाहा । ओं ऐं श्रीमत्सौभाग्यजनन्यै शिखायै वषट् ।

ओं श्रीं विज्ञानसुखदात्र्यै कवचाय हुम् । ओं ह्रीं समस्तसौभाग्यकर्त्र्यै नेत्राभ्यां वौषट् । ओं ऐं समस्तभूतान्तरसंस्थितायै अस्त्राय फट् । ओं श्रीं ह्रीं क्लीं ऐं स्वाहा । ओं भूर्भुवः स्वरोम् । इति दिग्बन्धः ।

**ध्यानफलम्**

पीतवस्त्रां सुवर्णाङ्गीं पद्महस्तां गदान्विताम् ।
लक्ष्मीं ध्यायेत मन्त्रेण स भवेत् पृथिवीपतिः ॥

**ध्यानम्**

कौशेयपीतवसनामरविन्दनेत्रां
पद्मद्वयाभयवरोद्यतपद्महस्ताम् ।
उद्यच्छतार्कसदृशीं परमाङ्कसंस्थां
ध्यायेद्विधीशनुतपादयुगां जनित्रीम् ॥१॥

या सा पद्मासनस्था विपुलकटितटी पद्मपत्रायताक्षी
गम्भीरावर्तनाभिः स्तनभरनमिता शुभ्रवस्त्रोत्तरीया ।
लक्ष्मीर्दिव्यैर्गजेन्द्रैर्मणिगणखचितैः स्नापिता हेमकुम्भै-
र्नित्यं सा पद्महस्ता मम वसतु गृहे सर्वमाङ्गल्ययुक्ता ॥२॥

हस्तद्वयेन कमले धारयन्तीं स्वलीलया ।
हारनूपरसंयुक्तां लक्ष्मीं देवीं विचिन्तये ॥३॥

(इति ध्यात्वा, मानसोपचारैः सम्पूज्य)

शङ्खचक्रगदाहस्ते शुभ्रवर्णे शुभानने (सुवासिनि) ।
मम देहि वरं लक्ष्मीः सर्वसिद्धिप्रदायिनि ॥(इति सम्प्रार्थ्य)
'ॐ श्रीं ह्रीं क्लीं ऐं महालक्ष्म्यै कमलधारिण्यै सिंहवाहिन्यै स्वाहा'
(इति मन्त्रं जप्त्वा, पुनः पूर्ववत् हृदयादिषडङ्गन्यासं पठेत्)